तोषितो भगवान् विष्णुर्ददात्यभिमतं फलम् ॥
देवकर्म्मणि सक्तानां तेषां संस्तुतिसंस्तवैः ।
तोषितोऽभिमतान् कामान् प्रयच्छति जना-
र्द्दनः ॥”
इति वह्निपुराणे क्रियायोगसाराध्यायः ॥
देवप्रतिष्ठायां वाद्यविधिर्यथा,—
“ततः प्रासादे स्थाप्योऽहं गीतवादित्रमङ्गलैः ।
सर्व्वगन्धांस्ततो दद्या इमं मन्त्रमुदाहरेत् ॥”
इति वाराहे शैलार्च्चास्थापनाध्यायः ॥
देवताविशेषगृहे वाद्यविशेषनिषेधो यथा ।
योगिनीतन्त्रे ।
“शिवागारे झल्लकञ्च सूर्य्यागारे च शङ्खकम् ।
दुर्गागारे वंशीवाद्यं माधुरीञ्च न वादयेत् ॥”
झल्लकं कांस्यनिर्म्मितकरतालम् । मत्स्यपुराणे ।
“गीतवादित्रनिर्घोषं देवस्याग्रे च कारयेत् ।
विरिञ्चेश्च गृहे ढक्कां घण्टां लक्ष्मीगृहे त्यजेत् ।
घण्टा भवेदशक्तस्य सर्व्ववाद्यमयी यतः ॥”
इति तिथ्यादितत्त्वम् ॥
वाद्यभाण्डं, क्ली, (वाद्यं वादनीयं भाण्डमिति ।)
वादनीयपात्रम् । मुरजादि । यथा,—
“पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले ।”
इत्यमरटीकायां भरतः ॥
अपि च ।
“वाद्यभाण्डमिदं देवि ! नानास्वरसमन्वितम् ।
भेरीपटहसंयुक्तं मया भक्त्या निवेदितम् ॥”
इति वृहन्नन्दिकेश्वरपुराणोक्तदुर्गोत्सवपद्धतिः ॥
वाध, ऋ ङ विहतौ । इति कविकल्पद्रुमः । ऋ,
अववाधत् । ङ, वाधते । इति दुर्गादासः ॥
वाधुक्यं, क्ली, विवाहः । इति त्रिकाण्डशेषः ॥
वाधूः, पुं, वहित्रम् । इति शब्दरत्नावली ॥
वाधीणसः, पुं, वार्ध्रीणसः । खड्गी । इति हला-
युधः ॥
वानं, त्रि, (ओ वै शोषणे + क्तः । ओदितश्चेति
नत्वम् ।) शुष्कफलम् । इत्यमरः ॥ शुष्कम् । इति
मेदिनी । ने, २० । (वनस्येदमिति । वन +
अण् ।) वनसम्बन्धी ॥
वानं, क्ली, (वा + ल्युट् ।) स्यूतिकर्म्म । कटः ।
गतिः । इति मेदिनी । ने, २० ॥ जलसंप्लुत-
वातोर्म्मिः । सुरङ्गा । सौरभः । इति हेमचन्द्रः ॥
गोक्षीरजं तवक्षीरम् । इति राजनिर्घण्टः ॥
वानप्रस्थः, पुं, (वनप्रस्थे जातः । अण् ।) मधूक-
वृक्षः । (अस्य पर्य्यायो यथा,—
“मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुस्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेऽत्र मधूलकः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
पलाशवृक्षः । (अस्य पर्य्यायो यथा,—
“वानपोथः पलाशः स्याद्वानप्रस्थश्च किंशुकः ।
राजादनो ब्रह्मवृक्षो हस्तिकर्णो दलोऽपरः ॥”
इति वैद्यकरत्नमालायाम् ।)
तृतीयाश्रमः । इति विश्वमेदिन्यौ ॥ * ॥ पुत्र-
मुत्पाद्य वनवासं कृत्वा अकृष्टपच्यफलादि भक्ष-
यित्वा ईश्वराराधनं करोति यः स वानप्रस्थः ।
स च द्विविधः । अश्मकुट्टः दन्तोलूखलिकश्च ।
इति श्रीभागवतमतम् ॥ तस्य धर्म्मो यथा,—
“भूमौ मूलफलाशित्वं स्वाध्यायस्तप एव च ।
संविभागो यथान्यायं धर्म्मोऽयं वनवासिनः ॥
तपस्तप्यति योऽरण्ये यजेद्देवान् जुहोति च ।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः ॥
तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
सन्न्यासीह स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥”
इति गारुडे ४९ अध्यायः ॥
अपि च ।
याज्ञवल्क्य उवाच ।
“वानप्रस्थाश्रमं वक्ष्ये तत् शृणुध्वं महर्षयः ।
पुत्त्रेषु भार्य्यां निःक्षिप्य वनं गच्छेत् सहैव वा ॥
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनः क्षमी ।
अफालकृष्टेनाग्नींश्च पितृदेवातिथींस्तथा ॥
भृत्यांस्तु तर्पयेत् श्मश्रुजटालोमभृदात्मवान् ।
दान्तस्त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात् ॥
स्वाध्यायवान् ध्यानशीलः सर्व्वभूतहिते रतः ।
अह्नो मासस्य वर्षां वा कुर्य्याद्वान्नपरिग्रहम् ॥
कृतं त्यजेदाश्वयुजे नयेत् कालं व्रतादिना ।
पक्षे मासे तु वाश्नीयाद्दन्तोलूखलिको भवेत् ॥
चान्द्रायणी स्वपेद्भूमौ कर्म्म कुर्य्यात् फलादिना ।
ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः ।
आर्द्रवासास्तु हेमन्ते योगाभ्यासाद्दिनं नयेत् ॥”
इति गारुडे १०२ अध्यायः ॥
पुनरपि ।
“जटिलत्वमग्निहोत्रित्वं भूशय्याजिनधारणम् ।
वने वासः पयो मूलं नीवारफलवृत्तिता ॥
प्रतिग्रहान्निवृत्तिश्च त्रिस्नानं व्रतधारिता ।
देवतातिथिपूजा च धर्म्मोऽयं वनवासिनः ॥”
इति गारुडे २१५ अध्यायः ॥
अन्यच्च ।
“वानप्रस्थाश्रमं धर्म्मं ते वक्ष्यामोऽवधार्य्यताम् ।
अपत्यसन्ततिं दृष्ट्वा प्राज्ञो देहस्य चायतिम् ॥
वानप्रस्थाश्रमं गच्छेदात्मनः शुद्धिकारणम् ।
तत्रारण्योपभोगेन तपोभिश्चात्मकर्षणम् ।
भूमौ शय्या ब्रह्मचर्य्यं पितृदेवातिथिक्रिया ॥
होमस्त्रिषवणस्नानं जटावल्कलधारणम् ।
वन्यस्नेहनिषेवित्वं वानप्रस्थविधिस्त्वयम् ॥”
इति वामने १४ अध्यायः ॥
अपरञ्च ।
व्यास उवाच ।
“एवं गृहाश्रमे स्थित्वा द्वितीयं भागमायुषः ।
वानप्रस्थाश्रमं गच्छेत् सदारः साग्निरेव च ॥
निःक्षिप्य भार्य्यां पुत्त्रेषु गच्छेद्वनमथापि वा ।
दृष्ट्वापत्यस्य चापत्यं जर्ज्जरीकृतविग्रहः ॥
शुक्लपक्षस्य पूर्व्वाह्णे प्रशस्ते चोत्तरायणे ।
गत्वारण्यं नियमांस्तपः कुर्य्यात् समाहितः ॥
फलमूलानि पूतानि नित्यमाहारमाहरेत् ।
यथाहारो भवेत्तेन पूजयेत् पितृदेवताः ॥
पूजयित्वातिथिं नित्यं स्नात्वा चाभ्यर्च्चयेत् सुरान् ।
ग्रामादाहृत्य चाश्नीयादष्टौ ग्रासान् समाहितः ॥
जटाश्च बिभृयान्नित्यं नखरोमाणि नो त्यजेत् ।
स्वाध्यायं सर्व्वदा कुर्य्यात् नियच्छेद्वाचमन्यतः ॥
अग्निहोत्रञ्च जुहुयात् पञ्चयज्ञं समाचरेत् ।
मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन तु ॥
चीरवासा भवेन्नित्यं स्नायात् त्रिषवणं शुचिः ।
सर्व्वभूतानुकम्पी स्यात् प्रतिग्रहविवर्ज्जितः ॥
दर्शेन पौर्णमासेन यजेत नियतं द्विजाः ।
ऋक्षेष्ट्या आग्रयणे चैव चातुर्म्मास्यानि चाहरेत् ॥
उत्तरायणञ्च क्रमशो दक्षस्यायनमेव च ।
वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहरेत् ॥
पुरोडाशं चरूंश्चैव विधिवन्निर्व्वपेत् पृथक् ।
देवताभ्यश्च तद्धुत्वा वन्यं मेध्यतरं हविः ॥
शेषं समुपभुञ्जीत लवणञ्च स्वयं कृतम् ।
वर्ज्जयेन्मधुमांसादि भौमानि कवकानि च ॥
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च ।
न फालकृष्टमश्नीयात् उत्सृष्टमपि केनचित् ॥
न ग्रामजातान्यार्त्तो वा पुष्पाणि च फलानि च ।
श्रावणे चैव विधिना वह्निं परिचरेत् सदा ॥
न द्रुह्येत् सर्व्वभूतानि निर्द्वन्द्वो निर्भयो भवेत् ।
न नक्तं किञ्चिदश्नीयात् रात्रौ ध्यानपरो भवेत् ॥
जितेन्द्रियो जितक्रोधस्तत्त्वज्ञानविचिन्तकः ।
ब्रह्मचारी भवेन्नित्यं न पत्नीमपि संश्रयेत् ॥
यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत् ।
तद्व्रतं तस्य लुप्येत प्रायश्चित्ती भवेत् द्विजः ॥
तत्र यो जायते गर्भो न संस्पृश्यो द्विजातिभिः ।
न हि वेदाधिकारोऽस्य तद्वंशेऽप्येवमेव हि ॥
अधः शयीत सततं सावित्रीजपतत्परः ।
शरण्यः सर्व्वभूतानां संविभागपरः सदा ॥
परिवादं मृषावादं निद्रालस्येऽपि वर्ज्जयेत् ।
एकाग्निरनिकेतः स्यात् प्रोक्षितां भूमिमाश्रयेत् ॥
मृगैः सह चरेद्वासं तैः सहैव च संवसेत् ।
शिलायां शर्करायां वा शयीत सुसमाहितः ॥
सद्यः प्रक्षालको वा स्यात् माससञ्चयिकोऽपि
वा ।
षण्मासनिचयो वा स्यात् समानिचय एव वा ॥
नक्तञ्चान्नं समश्नीयात् दिवा वाहृत्य शक्तितः ।
चतुःकालिकिको वा स्यात् स्याद्वा चाष्टम-
कालिकः ॥
चान्द्रायणविधानैर्वा शुक्ले कृष्णे च वर्त्तयेत् ।
पक्षे पक्षे समश्नीयात् यवागूं क्वथितां तथा ॥
पुष्पमूलफलैर्वापि केवलैर्वर्त्तयेत् सदा ।
स्वाभाविकैः स्वयं शीर्णैर्वैखानसमते स्थितः ॥
भूमौ वा परिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम् ।
स्थानासनाभ्यां विहरेत् न क्वचिद्धैर्य्यमुत्सृजेत् ॥
ग्रीष्मे पञ्चतपाश्च स्याद्वर्षास्वभ्रावकाशिकः ।
आर्द्रवासास्तु हेमन्ते क्रमशो वर्द्धयंस्तपः ॥
उपस्पृश्य त्रिषवणं पितृदेवांश्च तर्पयेत् ।
एकपादेन तिष्ठेत मरीचीर्वा पिबेत् सदा ॥
पञ्चाग्निधूमपो वा स्यादुष्मपः सोमपोऽथवा ।
पयः पिबेत् शुक्लपक्षे कृष्णपक्षे तु गोमयम् ॥
शीर्णपर्णाशनो वा स्यात् कृच्छ्रैर्वा वर्त्तयेत्सदा ।
योगाभ्यासरतो वा स्याद्रुद्राध्यायी भवेत् सदा ॥